**जायाघ्न** पु॰ जायां हन्ति "लक्षणे जायापत्योष्टक्" पा॰ लक्षण-इति हन-टक्। जायाहननसूचकलक्षणयुक्ते भर्त्तरि। "अमनुष्यकर्त्तृके च" पा॰ टक्। २तिलकालके सि॰कौ॰। तस्य जायाहननसूचकत्वात् तथात्वम्। एवं ज्योतिषोक्ते ३योगभेदे च "यावन्तः पापखेटामदनसदनगास्तावतीनां विरामः" इत्युक्तयोगस्य जायानाशसूचकत्वात् तथात्वम्।

**जायाजीव** पु॰ जायया तद्वर्त्तनवृत्त्या जीवति-अच्। नटे अमरः। [१नटे २बकखगे च मेदि॰।

**जायानुजीविन्** पु॰ जायया अनुजीवति अनु+जीव-णिनि।

**जायिन्** त्रि॰ जि-णिनि। १जययुक्ते "अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः" भा॰व॰ ३५अ॰ "जायीतिनाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः। सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे" सङ्गीतदा॰उक्ते २ध्रुवकभेदे पु॰। तत्र जायीति पाठान्तरम्। स्त्रीत्वार्थे तु इनि जयीत्येव।

**जायु** पु॰ जयति रोगान् जि-उण्। १औषधे अमरः। २जयशीले त्रि॰। "मखाव्यमितो जायवीरणे" १।११९।२। "वनेषु जायुर्मर्त्तेषु" ऋ॰ १।६७।१।

**जाये(या)न्य** पु॰ जि-बा॰ ए (या) न्यण्। जयशीले। "यो हरिमा जायान्योऽङ्गभेदो विसल्पकः" अथ॰१९।४४।२। तैत्तिरीये तु जायेन्य इति पाठः।

**जार** पु॰ जीर्य्यत्यनेन जॄ-करणे घञ्। १उपपतौ अमरः। "शूद्रो यदर्य्यायै जारो न पोषमनुमन्यते" यजु॰२३।३१। "जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्" याज्ञ॰। बा॰ कर्त्तरि घञ्। २जारके च। "स्वसारं जारो अभ्येति पश्चात्" ऋ॰१०।३।३। "जारोजरयिता" भा॰।

**जारज** पुंस्त्री जारात् उपपतेर्जायते जन-ड। अनियुक्तायां स्त्रियां १उपपतिजाते (वेजन्मा) पुत्रे २तथाभूतकन्यायां स्त्री "अमृते जारजः कुण्डः मृते भर्त्तरि गोलकः" अमरः। जन-क्त ५त॰। जारजातादयोऽप्यत्र। "अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्। उभौ तौ नार्हतो भागं जारजातककामजौ" मनुः।

**जारजयोग** पु॰ जारजस्य सूचको योगः। ज्योतिषोक्ते योगभेदे। "न लग्नमिन्दुञ्च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समायुतम्। सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्। अम्नपादर्क्षसंयोगात् द्वितीया द्वादशी यदि। सप्तमी चार्कमन्दारे जायते जारजो ध्रुवम्"। अन्योऽपि योगः हृच्छातकोक्तः जातकशब्दे ३०८६ पृ॰ दृश्यः।

**जारण** पु॰ जारयति जॄ-णिच्-ल्यु। जारके १द्रव्यभेदे। जार्य्यतेऽनेन जॄ-णिच् करणे ल्युट्। २जारणसाधने द्रव्यभेदे। कर्त्तरि ल्यु। ३जीरके स्त्री ङीप् राजनि॰। भावे-ल्युट्। ४जीर्णतासम्पादने न॰।

**जारतिनेय** पुंस्त्री जरत्या अपत्यम् ढक् कल्याण्या॰इनङ्। १जरत्या अपत्ये। जरतिनोऽपत्यं शुभ्रा॰ढक्। २जरतिनोऽपत्ये च। [पोषके।

**जारभर** पु॰ जारं बिभर्त्ति पोषयति भृ-पचा॰ अच्। जार-

**जारित** त्रि॰ जॄ-णिच्-क्त। १शोधिते २मारिते धात्वादौ।

**जारी** स्त्री जॄ-णिच्-अच् गौरा॰ ङीष्। (जाड़ी) ख्याते ओषधभेदे मेदि॰।

**जारु** पु॰ जॄ-उण्। १जरायौ। "बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि च चोद्भिज्जानि" ऐत॰ उ॰। "जारुजानि जरायुजानि मनुष्यादीनि" भाष्यम्। २जारके त्रि॰।

**जारुधि** पु॰ जारुर्जारको द्रव्यभेदो धीयतेऽस्मिन् धा-आधारे कि उप॰स॰। सुमेरोः कर्णिकाकेशरभूते पर्वतभेदे। "कुरङ्ग कुरर कुसुम्भ वैकङ्क त्रिकुट शिशिर पतङ्ग रुचक निषधशितिवास कपिल शङ्ख वैदूर्य्य जारुधि हंसऋषभ नागकालञ्जर नारदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः" भाग॰५।१६।२२।

**जारुथी** स्त्री जरूथेन असुरविशेषेण निर्वृत्ता अण् ङीप्। नगरीभेदे "जारूथ्यामाहुतिः क्राथः शिशुपालोजनैः सह" भा॰व॰२२अ॰। "जारूथ्यां नगर्य्याम्" नीलक॰ "जारूथ्यामाहुतिः क्राथः शिशुपालश्च निर्जितः" हरिवं॰१६ अ॰।

**जारूथ्य** त्रि॰ जरूथं मांसं स्तोत्रं वा तदर्हति अञ्। १मांसदानपुष्टे २स्तोत्रार्हे च "दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान्" भा॰व॰१९३अ॰। "जारूथ्यान् त्रिगुणदक्षिणानित्यर्जुमिश्रः" तच्चिन्त्यं जुवध्यामथस्त्रिवृषादिस्थले जयति जरूथं मांसमिति शाब्दिकाः तथा च मांसमयान् मांसादिदानप्रधानान् पुष्टानित्यर्थः। जरूथोऽसुरविशेषः इति वेदभाष्यम्। अत्र जरतेः स्तुत्यर्थस्य शब्दसाहूप्यादर्थाविरोधाच्च जरूथं स्तोत्रमुच्यत इति जारूथ्यान् स्तोत्रार्हानित्यर्थः" नीलक॰। जारूथ्यशब्दकल्पनं भ्रमादिकमेव।

**जाल** पु॰न॰ जल-घाते ज्वला॰ ण, चु॰ जल-संवरणे कर्त्तरि अच् वा। १गवाक्षसूत्रनिर्मिते स्वनामख्याते पदार्थे अमरः "अभ्यायपुत्र सं देवं निखिता जालकर्मणि। जालं ते